बुधवारो भवेत् क्वचित्। तदा तदा हि सा ग्राह्या एकभक्ताशने नृप!। सन्ध्याकाले तथा चैत्रे पक्षघ्ने च जनार्दने। बुधाष्टमी न कर्त्तव्या हन्ति पुण्यं पुरातनम्" अन्त्यं पद्यं हेमाद्रौ न धृतम्।

नवमी तु सर्वमते पूर्वा युग्मवाक्यात् "न कुर्य्यान्नवमीं तात! दशम्या तु कदाचन" इति स्कान्दाच्च।

दशमी पूर्वा परा वेति हेमाद्रिः "कृष्णा पूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता" इति माधवः वस्तुतस्तु तुल्या नवमीयुतैव ग्राह्या "दशमी तु प्रकर्त्तव्या सदुर्गा द्विजसत्तम!" इत्यापस्तम्बोक्तेः यत्तु "संपूर्णा दशमी कार्य्या पूर्वया परयाऽथ वा" इत्यङ्गिरसोक्तं तन्नवमीयुक्ताऽलाभे औदयिकी ग्राह्येत्येवं नेयम्"।

एकादशीनिर्णयस्तु कालमाधवीयानुसारेण एकादशीशब्दे १४८८ पृ० उक्तः। महाद्वादश्यादिनिर्णयः नि० सि० यथा "अथाष्टौ महाद्वादश्यः तत्र शुद्धाधिकैकादशीयुक्ता द्वादशी उन्मीलिनी१ संज्ञा द्वादश्येव शुद्धाधिका वर्द्धते चेत्तदा वञ्जुली२ वासरत्रयस्पर्शिनी त्रिस्पृशा३ अथ पर्वणः संपूर्णाधिकत्वे पक्षवर्द्धिनी४। पुष्यर्क्षयुता जया५ श्रवणयुता विजया६ पुनर्वसुयुता जयन्ती७ रोहिणीयुता पापनाशिनी८ एताः पापक्षयमुक्तिकाम उपवसेत्। अत्र मूलं हेमाद्रौ ज्ञेयम्। एकादशीद्वादश्योरेकाहे तन्त्रेणोपवासः, पार्थक्ये तु शक्तस्योपवासद्वयम् "एकादशीमुपोष्यैव द्वादशीं समुपोषयेदिति विष्णुरहस्यात् अशक्तौ तु द्वादश्यामेव "एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति" तत्रैवोक्तेः। यदा त्वल्पा द्वादशी तदोक्तं मात्स्ये "यदा भवति स्वल्पापि द्वादशी पारणादिने। उषःकाले द्वयं कुर्य्यात्प्रातर्माध्याह्निकं तदा। नारदीयेऽपि "अल्पायामथ विप्रेन्द्र! द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्य्या दानहोमादिसंयुताः" इति सङ्कटे तु माधवीये देवलः "सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत् कथम्। अद्भिस्तु पारणात् कुर्य्यात् पुनर्भुक्तं न दोषकृदिति"। सङ्कटे त्रयोदशीश्राद्धप्रदोषादौ। अत्र केचिदाहुः अपकर्षवाक्यान्यनाहिताग्निविषयाणि अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादिति। द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्य्यम् "द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः। तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः" इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः। अत्र केचित् सङ्गिरन्ते यदा भूयसी द्वादशी तदापि प्रातर्मुहूर्त्तत्रये पारणं कार्य्यम् "सर्वेषामुपवासानां प्रातरेव हि पारणमिति" वचनादिति। अस्मद्गुरवस्तु बहूनां कर्म्मकालानां विना कारणं बाधापत्तेः प्रागुदग्वचनैश्च अल्पद्वादश्यामेवापकर्षविधानादपराह्ण एव कार्य्यम्। प्रातःशब्दस्तु "सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति" वदपराह्णवाचित्वेऽप्युपपन्नः न च वाक्यवैयर्थ्यं पुनर्भोजनसायंपारणनिवृत्त्यर्थत्वात्तस्येत्याहुः। प्रमादेन एकादश्युपवासातिक्रमे अपरार्के वाराहे "एकादशी विलुप्ता चेद्द्वादशीपरतः स्थिता। उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति" कैश्चित्तु वैष्णवं पदमिति पठितम् अत्राविरोधिनो नियमाः सर्वव्रतेषु बोद्धव्याः। अन्ये च नवरात्रे वक्ष्यन्ते इति दिक्।

द्वादशी तु पूर्वैव युग्मवाक्यात् "द्वादशी तु प्रकर्त्तव्या एकादश्या युता प्रभो!" इति स्कान्दाच्च।

त्रयोदशी तु सर्वमते शुक्ला पूर्वा, कृष्णोत्तरा "त्रयोदशीतिथिः पूर्वः सितोऽथाऽसितः पश्चादिति" दीपिकोक्तेः "शुक्ला त्रयोदशी पूर्वा परा कृष्णा त्रयोदशीति" माधवीयाच्च

चतुर्दशी सर्वमते कृष्णा पूर्वा, शुक्लोत्तरा, उपवासे तु द्वय्यपि परेति मदनरत्ने।

पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे ग्राह्ये "भूतविद्धे न कर्त्तव्ये दर्शपूर्णे कदाचन। वर्जयित्वा मुनिश्रेष्ठ! सावित्रीव्रतमुत्तममिति" ब्रह्मवैवर्त्तात् "अमायां योगविशेषमाहाऽपरार्के शातातपः "अमावस्यां भवेद्वारो यदा भूमिसुतस्य वै। जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत्"।

"अमा वै सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण विषुवत्सदृशं फलम्" तत्रैव व्यासः "सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्। गोसहस्रफलं दद्यात् स्नानं वै मौनिना कृतम्"। हेमाद्रौ वृद्धमनुः "श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते"। नागदैवतम् अश्लेषा मस्तको मृगशिरः। प्रथमपाद इत्यन्ये स च सर्वेषाम्"।

सर्वतिथिषु वर्ज्यान्याह मुहूर्त्तदीपिकायाम् "कुष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा तैलं चामलकं दिवं प्रवसता शीर्षं कपालान्त्रकम्। निष्पावांश्च मसूरिकान् फलमथो वृन्ताकसंज्ञं मधु द्यूतं स्त्रीगमनं क्रमात् प्रतिपदादिष्वेवमाषोड़शात्" "शीर्षं नारिकेलम्, कपालम् अलावु, अन्त्रं पटोलकम्" भूपालः "कुष्माण्ड"